नं० १०३३-प

महाभारते मनुस्मृतिः (पुराणेतिहासः)

पत्राणि ३ (सम्पूर्णम्)

नं० १०३३-प

३ पत्रे

इदमेवमहाराजपृष्टवांसेपितामहः ॥ भीष्मंधर्मभृतांश्रेष्ठंधर्मपुत्रोयुधिष्ठिरः ॥ २ ॥ युधिष्ठिरउवाच ॥ ४

नं० १०३२

श्रीगणेशायनमः ओंनमोभगवतेवासुदेवाय शौनकोवाच महातेजोमहाप्राज्ञस
र्वशास्त्रविशारद अक्षीणकर्मबंधस्तुपुरुषोद्विजसत्तम १ मरणेयज्जपेज्जाप्यंयंनुभाव
मनुस्मरन् परमंपदमाप्नोतितन्मेब्रूहिसुनिश्चितं २ शौनकोवाच श्रीवत्सांकंजग
द्बीजमनंतंलोकसाक्षिणं पुरानारायणंदेवंनारदःपर्यपृच्छत ३ नारदोवाच भगवन्
भूतभव्येशश्रद्दधानैर्जितेंद्रियैः कथंभक्तैर्विचिंत्योसिमरणेपर्युपस्थिते ४ किंवा
नित्यंजपेज्जाप्यंतस्मादुत्थायमानवः सुप्तोविबुद्धोध्यायेच्चतन्मेब्रूहिसनातन ५ सू
त्वातस्यतुदेवर्षेर्वाक्यंवाक्यविशारदः प्रोवाचभगवान्विष्णुर्नारदंजगतांपतिः ६ ॥
श्रीभगवानोवाच हंततेकथयिष्यामिमुनेदिव्यामनुस्मृतिं मरणेयामनुस्मृत्यप्राप्नो
तिपरमांगतिं ७ ओंकारमादितःकृत्वामामनुस्मृत्यचात्मनः एकाग्रःप्रयतोभूत्वा
त्विमंमंत्रमुदीरयेत् ८ ॐनमोभगवतेवासुदेवाय अनंतंशाश्वतंदेवमव्यक्तंपुरु
षोत्तमं प्रपद्येप्रांजलिर्विष्णुमच्युतंपरमेश्वरं ९ पुराणंपुरुषंविष्णुमनंतंलोकसा
क्षिणं प्रपद्येपुंडरीकाक्षमीशंभक्तानुकंपितं १० लोकनाथंसहस्राक्षमक्षरंपरमंप
दं भगवंतंप्रपन्नोस्मिभूतभव्यभवत्प्रभुं ११ स्रष्टारंसर्वलोकानामनंतबलपौरुषं
पद्मनाभंहृषीकेशंप्रपद्येसत्यमव्ययं १२ हिरण्यगर्भंभूगर्भममृतंविश्वतोमुखं प्र
भाकरमनाद्यंतंप्रपद्येभास्करद्युतिं १३ सहस्रशिरसंदेवंवैकुंठंतार्क्ष्यमेवच प्रपद्ये
सूक्ष्ममचलंवरेण्यमभयप्रदं १४ नारायणंनारसिंहंयोगात्मानंसनातनं शरण्यं

अ.स्मृ. सर्वभूतानांप्रपद्येऽहमवमीश्वरं १५ अव्यक्ताद्व्यक्तमुत्पन्नमव्यक्ताद्यःपरःप्रभुः तस्मात्पर
१ तरंनास्तितमस्मिञ्छरणंगतः १६ चिंतयंतोहियंनित्यंब्रह्मेशानादयःप्रभुं निश्चयंनाधि
गच्छंतितमस्मिञ्छरणंगतः १७ जितेंद्रियामहात्मानोज्ञानध्यानपरायणाः यंप्राप्यननि
वर्त्तंतेतमस्मिञ्छरणंगतः १८ यःप्रभुःसर्वभूतानांयेनसर्वमिदंततं चराचरगुरुर्देवःस
मेविष्णुःप्रसीदतु १९ एकांशेनजगत्सर्वंयोवष्टभ्यस्थितोविभुः अग्राह्योनिर्गुणःशा
स्तातमस्मिञ्छरणंगतः २० यस्मान्जातःपुराब्रह्मापद्मयोनिपितामहः प्रसीदतुसमे
विष्णुःपितामहपरःप्रभुः २१ यःपुराप्रलयेप्राप्तेनष्टेलोकेचराचरे एकस्तिष्ठतियोमात्मा
समेविष्णुःप्रसीदतु २२ पर्जन्यःपृथिवीसस्यंकालोधर्मःक्रियाफलं गुणाकारःप्रभु
रीशोभास्करदेवःप्रसीदतु २३ अग्निसोमार्कताराणांब्रह्मरुद्रेंद्रयोगिनां स्वस्तिसुर्यस्यते
जांसिसमेविष्णुःप्रसीदतु २४ चतुर्भिश्चचतुर्भिश्चद्वाभ्यांपंचभिरेवच हूयतेचपुनर्द्वा
भ्यांतस्मैयज्ञात्मनेनमः २५ दिवाकरस्यसौम्यंहिमध्येयंचव्यवस्थितं क्षेत्रज्ञमिति
यंप्राहुःसमहात्माप्रसीदतु २६ अथयस्मिन्महात्मावहुविज्ञेयःसनातनः आस्थि
तःप्रकृतिंभुंक्तेसमहात्माप्रसीदतु २७ क्षेत्रज्ञंपंचधाभुंक्तेप्रकृतिंबहुधागुणैः मनो
गुणांश्चयोभुंक्तेसमहात्माप्रसीदतु २८ सांख्ययोगाश्चयोगात्मासाध्याश्चैवमहर्षयः
यंविदित्वाविमुच्यंतेसमहात्माप्रसीदतु २९ स्वामीगर्भस्ययोगर्भस्तस्यगर्भस्ययोरिपुः
रिपुगर्भस्ययोगर्भसमेविष्णुःप्रसीदतु ३० यस्यहस्तेगदाचक्रंगरुडोयस्यवाहनं ॥ १

यज्ञगर्भमहाभागयंचयज्ञनमोस्तुते॥ चतुर्मूर्त्तिजगद्धामलक्ष्मीवासवरप्रद ५

शंखःकरतलेयस्यसमेविष्णुःप्रसीदतु ३१ चतुर्मूर्त्तिपरंधामलक्ष्मीवासोचिरार्चितः सर्वा
धिवासनान्योसिवासुदेवनमोस्तुते ३२ योगावासनमस्तुभ्यंसर्वावासवरप्रदं सर्वावास
नमस्तेस्तुसाक्षिभूतजगत्पते ३३ अजेयःखंडपरशुर्विष्णुमूर्त्तिर्वृषाकपिः त्रिगुणोपंच
कालायनमस्तेज्ञानसागर ३४ नमस्तेसर्वतोभद्रसर्वतोक्षिशिरोमुख निर्विकारनम
स्तेस्तुसाक्षिभूतोह्यवस्थितेः ३५ अतीन्द्रियनमस्तुभ्यंलिंगैस्त्वमनुमीयते येतुभ्यंना
भिजानातिसंसारेसंसरंतिते ३६ नमस्तेपुंडरीकाक्षपुनरेवनमोस्तुते ईश्वरोसिजग
न्नाथकिमतःपरमुच्यते ३७ रागद्वेषविनिर्मुक्तोलोभमोहविवर्जितः अशरीरःश
रीरस्थसमःसर्वेषुदेहिषु ३८ अव्यक्तबुद्ध्यहंकारमात्राभूतेंद्रियाणिच त्वयितानि
नतेषुत्वंतेषुत्वंतानिनत्वयि ३९ स्रष्टाभोक्तासिकूटस्थोगुणानांप्रभुरीश्वरः प्रवृ
त्याहेतुरहितःप्रभुरात्मान्यवस्थितः ४० भक्तानांयोहिदेवस्त्वंतंध्यामास्त्वनरोत्तम॥
समोभूतेषुसंयोगोनपुनर्भवजन्मनि ४१ नाहंकारेणबोध्योहितथासत्वादिभिर्गुणैः
नधर्मोनत्वधर्मोवानपुनर्भवजन्मनि ४२ विषयैरिंद्रियैश्चैवमामेभूयात्समागमः
पृथिवीयातुमेघ्राणंयातुमेरसनाजलं ४३ चक्षुर्हुताशनंयातुस्पर्शोमेयातुमारुतं।
श्रोत्राकाशमभ्येतुचंद्रंवैकारिकंमनः ४४ अहंकारश्चमेबुद्धिंत्वयिबुद्धिःसमेतु
च वियोगःसर्वकारणगुणैर्भूतैश्चमेभवेत ४५ सत्वंरजस्तमश्चैवप्रकृतिंप्रविशं
तुमे साकेवलपदंदेवीप्रयातुपरमंतव ४६ एकभावोभवोवास्तुमामेजन्मभवेत्पुनः॥

अ॰स्म॰ नमो भगवते तस्मै विष्णवे प्रभविष्णवे ४७ त्वमेवास्त्वद्गतप्राणास्त्वद्भक्तास्त्वत्परायणाः
२ त्वामेवानुस्मरन्तिस्म मरणे पर्युपासते ४८ पूर्वदेहकृतायेमेव्याधयस्तेविशन्तुमां
मर्दयन्तुचदुःखानि ऋणमेप्रतिमुच्यतां ४९ यिनष्टायांतुमेरोगायेमयापूर्वसंचिताः
अरोगंतुमिच्छामितद्विष्णोःपरमंपदं ५० कर्मेन्द्रियाणिसंयम्यपंचबुद्धीन्द्रियाणिच
दशेंद्रियाणिमनसित्वहंकारेतथात्मनः ५१ अहंकारंतथाबुद्धौबुद्धिंचात्मनियोजयेत्।
जितबुद्धीन्द्रियःपश्येद्बुद्ध्याबुद्धेःपरात्परं ५२ मायायस्येतितस्याहंयेनसर्वमिदंततं आ
त्मनात्मनिसंयोज्यपरमात्मानमव्ययं ५३ ततोबुद्धेःपरंबुध्वालभतेनपुनर्भवं नमोभ
गवतेतस्मैयेनसर्वमिदंततं ५४ अहंभगवतस्तस्यममचासौसुरेश्वरः तस्याहंनप्र
णश्यामिसचमेनप्रणश्यति ५५ इमांमनुस्मृतिंदिव्यांवैष्णवींपापनाशिनीं स्वप्नेवि
बुद्धश्चपठन्त्रिसंध्यंवापियःस्मरेत् ५६ अपिपापसमाचारःसोपियातिपरंपदं म
रणेवापिसंप्राप्तेयदिमामनुस्मरेत् ५७ यदहंकारमाश्रित्ययज्ञदानतपःक्रियाः।
कुर्वन्फलमवाप्नोतिपुनरावर्तनंयतः ५८ अर्चयन्नपियोदेवान्नैवापिबलिंददत् जु
ह्वन्वदन्स्मरेद्वापिलभतेपरमांगतिं ५९ यज्ञदानंतपस्तस्मात्कुर्याद्राशावर्जितः पूर्णि
मायाममायाञ्चद्वादश्यांवाविशेषतः ६० भावयेत्श्रद्दधानेभ्योयेचान्येमामुपाश्रिताः।
नमस्त्वेवयोग्याःस्मृताःश्रद्धयान्विताः ६१ तस्याक्षयोभवेत्लोकाःश्वपाकस्यापिनार
द। किंपुनर्यजतेयोमांसाधकोविधिपूर्वकं ६२ अश्वमेधसहस्राणांयःसहस्रंसमाचरेत्। २

अ॰स्मृ॰ नाश्नोतितत्फलमाप्नोतिमद्भक्त्यायदवाप्नुयात् ६३ एवंदत्तंतपोधीतंव्रतानिनियमाश्चये सर्वेमे
३ तद्विनाशायज्ञानंशांतिनविद्यते ६४ तस्मात्सदयासाधुभ्यःसर्वसत्वाभयंकरी कृत्स्ना
चपृथिवींदद्यान्नतत्तुल्यंकदाचनः ६५ कांतारेवनदुर्गेषुकृत्स्नेचभवसंभवे दस्युभिःसं
निरुद्धस्तुनाममिमंप्रकीर्तयेत् ६६ जलेरक्षतुवाराहःस्थलेरक्षतुवामनः अटव्यांना
रसिंहस्तुसर्वतःपातुकेशवः ६७ सकृदुच्चारितंयेनहरिरित्यक्षरद्वयं बद्धःपरिकरस्ते
नुमोक्षायगमनंप्रति ६८ तस्मात्त्वमेवदेवर्षेध्यायंस्त्वातंद्विजोहरिं अवाप्स्यसिततः
सिद्धिंपरंद्रक्ष्यसितत्फलं ६९ नाहंवसामिवैकुंठेयोगिनांहृदयेनच मद्भक्तायत्रगा
यंतितत्रतिष्ठामिनारद ७० वैशंपायनउवाच एवंसदेवदेवेननारदःप्रतिबोधितः
चकारकेशवेभक्तिंतस्मात्संकुरुभूपते ७१ संसारएवसीमंतोयःसत्वानांकिलक
प्यते ननुध्यायतियोदेही कथयामिचतत्फलं ७२ सनामध्यायतेनित्यंसर्वेयाति
परांगतिं सर्वबंधविनिर्मुक्तःपरंपदमवाप्नुयात् ७३ इतिश्रीमहाभारतेशतसह
स्रसंहितायांवैयासिक्यांशांतिपर्वणिअनुस्मृतिसमाप्त शुभंभवतु श्रीरस्तु॥

3